श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ एकत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकत्रिंशः सर्गः ॥

## सुग्रीवं प्रति लक्ष्मणस्य कोपः, श्रीरामेण तस्य सान्त्वनं किष्किन्धाद्वारमुपेत्य लक्ष्मणेन सुग्रीवपार्श्वेऽङ्गदस्य प्रेषणं वानराणां भयं प्लक्षप्रभावाभ्यां सुग्रीवाय कर्तव्यस्योपदेशश्च

स कामिनं दीनमदीनसत्त्वं
शोकाभिपन्नं समुदीर्णकोपम्।
नरेन्द्रसूनुर्नरदेवपुत्रं
रामानुजः पूर्वजमित्युवाच॥ **4.31.1** ॥

न वानरः स्थास्यति साधुवृत्ते
न मन्यते कर्मफलानुषङ्गान्।
न भोक्ष्यते वानरराज्यलक्ष्मीं
तथा हि नातिक्रमतेऽस्य बुद्धिः॥ **4.31.2** ॥

मतिक्षयाद् ग्राम्यसुखेषु सक्त -
स्तव प्रसादात् प्रतिकारबुद्धिः।
हतोऽग्रजं पश्यतु वीर तस्य
न राज्यमेवं विगुणस्य देयम्॥ **4.31.3** ॥

न धारये कोपमुदीर्णवेगं
निहन्मि सुग्रीवमसत्यमद्य।

हरिप्रवीरैः सह वालिपुत्रो
    नरेन्द्रपुत्र्या विचयं करोतु ॥ **4.31.4** ॥

तमात्तबाणासनमुत्पतन्तं
    निवेदितार्थं रणचण्डकोपम्।
उवाच रामः परवीरहन्ता
    स्ववीक्षितं सानुनयं च वाक्यम् ॥ **4.31.5** ॥

नहि वै त्वद्विधो लोके पापमेवं समाचरेत्।
कोपमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ **4.31.6** ॥

नेदमत्र त्वया ग्राह्यं साधुवृत्तेन लक्ष्मण।
तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च सङ्गतम् ॥ **4.31.7** ॥

सामोपहितया वाचा रुक्षाणि परिवर्जयन्।
वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये ॥ **4.31.8** ॥

सोऽग्रजेनानुशिष्टार्थो यथावत् पुरुषर्षभः।
प्रविवेश पुरी वीरो लक्ष्मणः परवीरहा ॥ **4.31.9** ॥

ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः।
लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः ॥ **4.31.10** ॥

शक्रबाणासनप्रख्यं धनुः कालान्तकोपमम्।
प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव ॥ **4.31.11** ॥

यथोक्तकारी वचनमुत्तरं चैव सोत्तरम्।
बृहस्पतिसमो बुद्ध्या मत्वा रामानुजस्तदा ॥ **4.31.12** ॥

कामक्रोधसमुत्थेन भ्रातुः क्रोधाग्निना वृतः।
प्रभञ्जन इवाप्रीतः प्रययौ लक्ष्मणस्ततः ॥ **4.31.13** ॥

सालतालाश्वकर्णांश्च तरसा पातयन् बलात्।
पर्यस्यन् गिरिकूटानि द्रुमानन्यांश्च वेगितः॥ **4.31.14** ॥

शिलाश्च शकलीकुर्वन् पद्भ्यां गज इवाशुगः।
दूरमेकपदं त्यक्त्वा ययौ कार्यवशाद् द्रुतम्॥ **4.31.15** ॥

तामपश्यद् बलाकीर्णां हरिराजमहापुरीम्।
दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां गिरिसङ्कटे॥ **4.31.16** ॥

रोषात् प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः।
ददर्श वानरान् भीमान् किष्किन्धायां बहिश्चरान्॥ **4.31.17** ॥

तं दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभम्।
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान्।
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे॥ **4.31.18** ॥

तान् गृहीतप्रहरणान् सर्वान् दृष्ट्वा तु लक्ष्मणः।
बभूव द्विगुणं क्रुद्धो बह्विन्धन इवानलः॥ **4.31.19** ॥

तं ते भयपरीताङ्गा क्षुब्धं दृष्ट्वा प्लवङ्गमाः।
कालमृत्युयुगान्ताभं शतशो विद्रुता दिशः॥ **4.31.20** ॥

ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः।
क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन्॥ **4.31.21** ॥

तारया सहितः कामी सक्तः कपिवृषस्तदा।
न तेषां कपिसिंहानां शुश्राव वचनं तदा॥ **4.31.22** ॥

ततः सचिवसन्दिष्टा हरयो रोमहर्षणाः।
गिरिकुञ्जरमेघाभा नगरान्निर्ययुस्तदा॥ **4.31.23** ॥

नखदंष्ट्रायुधाः सर्वे वीरा विकृतदर्शनाः।
सर्वे शार्दूलदंष्ट्राश्च सर्वे विवृतदर्शनाः॥ **4.31.24** ॥

दशनागबलाः केचित् केचिद् दशगुणोत्तराः।
केचिन्नागसहस्रस्य बभूवुस्तुल्यवर्चसः॥ **4.31.25** ॥

ततस्तैः कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः।
अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदाम्॥ **4.31.26** ॥

ततस्ते हरयः सर्वे प्राकारपरिखान्तरात्।
निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतं तदा॥ **4.31.27** ॥

सुग्रीवस्य प्रमादं च पूर्वजस्यार्थमात्मवान्।
दृष्ट्वा क्रोधवशं वीरः पुनरेव जगाम सः॥ **4.31.28** ॥

स दीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः।
बभूव नरशार्दूलः सधूम इव पावकः॥ **4.31.29** ॥

बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान्।
स्वतेजोविषसम्भूतः पञ्चास्य इव पन्नगः॥ **4.31.30** ॥

तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम्।
समासाद्याङ्गदस्त्रासाद् विषादमगमत् परम्॥ **4.31.31** ॥

सोऽङ्गदं रोषताम्राक्षः सन्दिदेश महायशाः।
सुग्रीवः कथ्यतां वत्स ममागमनमित्युत॥ **4.31.32** ॥

एष रामानुजः प्राप्तस्त्वत्सकाशमरिन्दम।
भ्रातुर्व्यसनसन्तप्तो द्वारि तिष्ठति लक्ष्मणः॥ **4.31.33** ॥

तस्य वाक्यं यदि रुचिः क्रियतां साधु वानर।
इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमरिन्दम॥ **4.31.34** ॥

लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत्।
पितुः समीपमागम्य सौमित्रिरयमागतः ॥ **4.31.35** ॥

अथाङ्गदस्तस्य सुतीव्रवाचा
    सम्भ्रान्तभावः परिदीनवक्त्रः।
निर्गत्य पूर्वं नृपतेस्तरस्वी
    ततो रुमायाश्चरणौ ववन्दे ॥ **4.31.36** ॥

सङ्गृह्य पादौ पितुरुग्रतेजा
    जग्राह मातुः पुनरेव पादौ।
पादौ रुमायाश्च निपीडयित्वा
    निवेदयामास ततस्तदर्थम् ॥ **4.31.37** ॥

स निद्राक्लान्तसंवीतो वानरो न विबुद्धवान्।
बभूव मदमत्तश्च मदनेन च मोहितः ॥ **4.31.38** ॥

ततः किलकिलां चक्रुर्लक्ष्मणं प्रेक्ष्य वानराः।
प्रसादयन्तस्तं क्रुद्धं भयमोहितचेतसः ॥ **4.31.39** ॥

ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम्।
सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ॥ **4.31.40** ॥

तेन शब्देन महता प्रत्यबुध्यत वानरः।
मदविह्वलताम्राक्षो व्याकुलः स्रग्विभूषणः ॥ **4.31.41** ॥

अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ।
मन्त्रिणौ वानरेन्द्रस्य सम्मतोदारदर्शनौ ॥ **4.31.42** ॥

प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः।
वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ **4.31.43** ॥

प्रसादयित्वा सुग्रीवं वचनैः सार्थनिश्चितैः।
आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम्॥ **4.31.44** ॥

सत्यसन्धौ महाभागौ भ्रातरौ रामलक्ष्मणौ।
मनुष्यभावं सम्प्राप्तौ राज्यार्हौ राज्यदायिनौ॥ **4.31.45** ॥

तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः।
यस्य भीताः प्रवेपन्तो नादान् मुञ्चन्ति वानराः॥ **4.31.46** ॥

स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः।
व्यवसायरथः प्राप्तस्तस्य रामस्य शासनात्॥ **4.31.47** ॥

अयं च तनयो राजंस्ताराया दयितोऽङ्गदः।
लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयानघ॥ **4.31.48** ॥

सोऽयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान्।
वानरान् वानरपते चक्षुषा निर्दहन्निव॥ **4.31.49** ॥

तस्य मूर्ध्ना प्रणामं त्वं सपुत्रः सहबान्धवः।
गच्छ शीघ्रं महाराज रोषो ह्यद्योपशाम्यताम्॥ **4.31.50** ॥

यथा हि रामो धर्मात्मा तत्कुरुष्व समाहितः।
राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः॥ **4.31.51** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकत्रिंशः सर्गः॥